**सफल** त्रि० सह फलेन सहस्य सः। १अव्यर्थे २फलयुक्ते च जटा०।

**सबल** त्रि० सह बलेन सामर्थ्येन सैन्येन वा सहस्य सः। १सामर्थ्यान्विते २सैन्ययुक्ते ३ज्यो०उक्तबलाढ्ये "सबलेऽव्दपतौ स्वस्थे राज्याप्ति सुखकीर्त्तयः" नील०ता०।

**सब्रह्मचारिन्** पु० समानं ब्रह्म वेदग्रहणकालीनं व्रतं चरति चर–णिनि समानस्य सः। एकगुरुसकाशात् वेदाध्ययनकाले तन्निबन्धनसमानव्रताचारयुते अमरः।

**सभर्त्तृका** स्त्री सह भर्त्रा पत्या सहस्य सः कप्। विद्यमानपतिकायां स्त्रियाम् अमरः।

**सभा** स्त्री सह भान्ति अभीष्टनिश्चयार्थमेकत्र यत्र गृहे। १बहूनां समावेशनस्थाने २तदधिष्ठायिजनसमूहे च अमरः "यस्मिन् देशे निषीदन्ति विप्रा वेदविदस्त्रयः। राज्ञः प्रतिकृतो विद्वान् ब्राह्मणस्तां सभां विदुः"। विद्वत्संहतावपि सभापर्य्यायपरिषच्छब्दमाह "त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्मपाठकः। त्रयश्चाश्रमिणः पूर्वे परिषत् स्याद्दशावरा" मनुः। ३द्यूते ४गृहे मेदि० ५समूहे हेमच०। समूहपरत्वे क्लीत० न०। दासीसभं नृपसभमित्यादि। व्यवहारदर्शनार्थसभास्थानञ्च वीरमि० दर्शितं यथा बृहस्पतिः "दुर्गमध्ये गृहं कुर्य्याज्जलवृक्षान्वितं पृथक्। प्रागदिशि प्राङ्मुखीं तस्य लक्षण्यां कल्पयेत् सभाम्। प्रतिमालेख्यदेवैश्च युक्तामग्न्यम्बुना तथा" इति लक्षण्यां वास्तुशास्त्रोक्तलक्षणेन लक्षिताम्। अग्न्यम्बु नेति समाहारद्वन्द्वः। सभाया धर्माधिकरणत्वं कात्यायन आह "धर्मशास्त्रानुसारेण अर्थशास्त्रविवेचनम्। यत्राधिक्रियते स्थाने धर्माधिकरणं हि तदिति"। तत्र सभ्योपवेशनमाह मनुः "यस्मिन् देशे इत्यादि" प्रागुक्तम् त्रय इत्युपलक्षणम् अधिकानामपि स्मृतत्वात्। तच्च वक्ष्यते। अधिकृतो विद्वान् प्राड्विवाकः अत्र प्रविशेत् सभाम् सभामेव प्रविश्येत्यादिवचनात् सभा मुख्यव्यवहारदर्शनस्थानम्। अन्यान्यमुख्यानि व्यवहारस्थानानि वाक्यादवगन्तव्यानि। "दश स्थानानि वादानां पञ्च चैवाब्रवीद् भृगुः। निर्णयं येन गच्छन्ति विवादं प्राप्य वादिनः। आरण्यास्तु स्वकैः कुर्य्युः सार्थिकाः सार्थिकैस्तथा। सैनिकाः सैनिकैरेव ग्रामेऽप्युभयवासिभिः। उभयानुमतञ्चैव गृह्यते स्थानमीप्सितम्। कुलिकाः सार्थमुख्याश्च पुरग्रामनिवासिनः। ग्रामपौरगणश्रेण्यश्चातुर्विद्यश्च वर्गिणः। कुलानि कुलिकाश्चैव नियुक्ता नृपतिस्तथा"। इति। स्वकैरारण्यैः ग्रामेऽपीत्यपिशब्दात् ये ग्रामेऽरण्यादौ च निवसन्ति ते उभयवासिभिर्निर्णयं कुर्य्युरुभयव्यवहाराभिज्ञत्वात्तेषाम् कुलिकाः कुलश्रेष्ठाः। सार्थो ग्रामदेवयात्रादौ मिलितो जनसङ्घः तन्मुख्याः सार्थवाहादयः। पुरं मुख्यनगरम् तस्मादर्वाचीनो ग्राम इति पुरग्रामनिवासिनोर्भेदः सार्थकुलिकादीनि पञ्च स्थानानि तानि चारण्यकादीनामेव, ग्रामादीनि दश स्थानानि साधारणानि। ग्रामो ग्रामाकारेणावस्थितो जनः। पौरः पुरवासिनां समूहः "श्रेण्यो रजकाद्यष्टादश हीनजातयः। चातुर्विद्यः आन्वीक्षिक्यादिविद्याचतुष्टयोपेतः वर्गिणो गणप्रभृतयः। राज्ञः सभाप्रवेशस्तत्रैव दर्शितः। तत्र मनुः "व्यवहारान् दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः। मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतः प्रविशेत् सभाम्। तत्रासीनः स्थितो वापि पाणिमुद्यम्य दक्षिणम्। विनीतवेशाभरणः पश्येत् कार्य्याणि कार्य्यिणाम्। प्रत्यहं देशदृष्टैश्च शास्त्रदृष्टैश्च हेतुभिः। अष्टादशसु मार्गेषु निबद्धानि पृथक् पृथक्। धर्मासनमधिष्ठाय संवीताङ्गः समाहितः। प्रणम्य लोकपालेभ्यः कार्य्यदर्शनमारभेत्" इति।

**सभाज** सेवने दर्शने च सक० प्रीतौ अ० अद०चु० उभ० सेट्। सभाजयति ते अससभाजत्–त। अनेकाच्त्वान्न षोपदेशः।

**सभाजन** न० सभाज–भावे ल्युट्। गमनागमनादिकाले सुखानन्दप्रीतिसाधने सम्भाषणे २पूजने च अमरः।

**सभासद्** पु० सभायां सीदति–क्विप्। सामाजिके सभ्ये अमरः तल्लक्षणमाह याज्ञ० "श्रुताध्ययनसम्पन्नाः धर्मज्ञाः सत्यवादिनः। राज्ञा सभासदः कार्य्या रिपौ मित्रे च ये समाः" इति। श्रुतेन मीमांसाव्याकरणादिश्रवणेन वेदाध्ययनेन च सम्पन्नाः। धर्मज्ञाः सत्यवादिनः सत्यवदनशीलाः रिपौ मित्रे च समाः द्वेषरागशून्याः एवंविधा सभासदः सभायां सदसि यथा सीदन्ति तथा दानमानसत्कारैः राज्ञा कर्त्तव्याः सभ्यत्वेन वरीतव्या इत्यर्थः। अतस्तेषामुपादेयत्वात् स्वाध्यायोऽध्येतव्यो यूपं छिनत्ति पुरोहितस्त्वं प्रकुर्वीतेत्यादिवत् सत्यपि कर्मत्वेऽनुद्देश्यत्वात् तद्गतैकत्वबहुत्वं विवक्षितम्। तच्च यद्यपि कपिञ्जलन्यायेन त्रित्वमात्रेणापि चरितार्थं तथापि स्मृत्यन्तरोक्तबहुत्वविकल्पपरम्। तथा च बृहस्पतिः "लोकवेदज्ञधर्मज्ञाः सप्त पञ्च त्रयोऽपि वा। यत्रोपविष्टा विप्राः स्युः सा यज्ञसदृशी सभा" इति। मनुना तु त्रय एवोक्ताः।